International Journal of Advanced Academic Studies 2022; 4(3): 192-197




**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
www.allstudyjournal.com
IJAAS 2022; 4(3): 192-197
Received: 20-06-2022
Accepted: 25-07-2022

**तारा बाई मीना**
शोधच्छात्रा, संस्कृत एवं प्राच्यविद्या अध्ययन संस्थान, JNU, नई दिल्ली, भारत

**Corresponding Author:**
**तारा बाई मीना**
शोधच्छात्रा, संस्कृत एवं प्राच्यविद्या अध्ययन संस्थान, JNU, नई दिल्ली, भारत

# व्याकरणशास्त्रे भाषाविषयकं चिन्तनम्

## तारा बाई मीना

### प्रस्तावना

भारतीयज्ञानपरम्परायां संस्कृतवाङ्मयस्य वैशिष्ट्यं सर्वविदितमस्ति। संस्कृतसाहित्यनिधेः विभागः द्विधा कर्त्तुं शक्यते लौकिकं वैदिकञ्च। वैदिकवाङ्मये वेदादारभ्य उपनिषत्पर्यन्तं सर्वमपि वैदिकवाङ्मयमन्तर्भवति। अन्यासां सर्वासामपि विद्यानां आधारः मूलं वा वेदा एव[1]। तत्र चत्वारो वेदाः तेषामुपवेदाः ब्राह्मणग्रन्थाः वेदाङ्गानि उपनिषदश्च। तत्रापि वेदाङ्गेषु शिक्षाकल्पव्याकरणनिरुक्तच्छन्दज्यौतिषाख्यानि अन्तर्भवन्ति। एषां परिगणनं वेदानामङ्गत्वेन स्वीक्रियते।

वेदाङ्गेषु व्याकरणशास्त्रस्य स्थानं मुखमिव मुख्यम् अस्ति[2]। तस्मिंश्च मुखस्थानीये प्रधाने व्याकरणे प्रयत्नः फलवान् भवतीति विज्ञापयति महर्षिः पतञ्जलिः[3]। इदं व्याकरणमतीव विस्तृतमस्ति। व्याकरणस्य अपरं नाम शब्दशास्त्रमपि विद्यते यतोहि शब्दानामनुशासनमेवात्र क्रियते। व्याकरणस्य परम्परा सुदीर्घा प्राचीना चास्ति अत एव उच्यते व्याकरणस्य प्रथमोपदेशकः शिवः[4] अस्ति। तस्मादारभ्य महर्षिपाणिनि-कात्यायन-पतञ्जलिप्रभृतयोऽऽचार्याः बभूवुः। महर्षिपाणिनेः व्याकरणं सार्वभौमव्याकरणं मन्यते। पाणिनेः अष्टाध्यायी मानवमनीषायाः सर्वोत्तमा कृतिरस्ति।[5] आचार्यपाणिनिना सर्वासां भाषाणां व्याकरणस्य प्रतिमानं प्रस्तुतम्। आचार्येण व्याकरणे भाषाविषयकं चिन्तनमतीव सूक्ष्मतया प्रकटितं पाणिनीयशिक्षायां यथा–

आत्माबुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया,
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।
मारुतस्तूरसि चरन्मन्दं जनयति स्वरम्॥[6]

---

[1] सर्वज्ञानमयो हि सः - मनुस्मृतिः २.७

[2] मुखं व्याकरणं स्मृतम् – पा.शि.४२

[3] प्रधानं च षड्ङ्गेषु व्याकरणं प्रधाने च कृतो यत्नः फलवान् भवति। - म.भा. पस्पशाह्निकम्

[4] नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।
उद्धर्तुकाम सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्॥ - नन्दिकेश्वर

[5] ब्लूम फील्ड

[6] पा.शि. ६,७

महर्षिपाणिनेः अष्टाध्याय्यां भाषाविषयकं सामाजिकं देशविषयकं च चिन्तनं गहनतया प्रस्तुतम्। स्वपूर्ववर्त्तिनामाचार्याणां मतमाचार्यः सादरम् उपस्थापयति– शाकल्यकश्यपगालवादीनां मतं सादरं स्मरति। इदमेव भारतीयज्ञानपरम्परायाः वैशिष्ट्यं यत् ते स्वपूर्ववर्त्तिनामाचार्याणां मतं संस्थाप्य तेषां आदरं कुर्वन्ति शास्त्रस्य च उपदेष्टृत्वेन स्वात्मानं मन्वते न तु कर्त्तृत्वेन। अस्यामेव परम्परायाम् अष्टाध्यायिग्रन्थे पतञ्जलिना महाभाष्यं नामकं वैयाकरणभाषाशास्त्रीयभाष्यं प्रणीतं कात्यायनेन च वार्तिकम्। अत: व्याकरणे त्रीनपि मुनीन् त्रिमुनि नाम्ना स्मर्य्यते। महाभाष्ये भाषावैज्ञानिकं चिन्तनं स्पष्टतया प्रतीयते, तस्य विवेचनमत्र प्रस्तोष्यते। भाषावैज्ञानिकचिन्तनाद् प्रागत्र वर्ण्यविषयस्य स्पष्टप्रतिपत्ति: स्यादतोऽत्र प्रदश्यंते-

**भारतीयचिन्तनम्**

विश्वसाहित्ये भारतवर्षमेव तत्स्थानं यत्र अनादिकालादेव चिन्तनं प्रारब्धं तच्च चिन्तनं भाषाकेन्द्रितम्। भाषाकेन्द्रितचिन्तनमेको महत्वपूर्णविषयोऽस्ति। यतोहि कश्चिदपि नर: चिन्तनं करोति तर्हि तस्य चिन्तनस्य साधनत्वेन भाषैव उपस्थिता भवति। भाषां विना कोऽपि चिन्तनं कर्त्तुं न शक्नोति। अत एव भारतीयचिन्तनं सृष्टिकालादेव भाषाकेन्द्रितमस्ति। अस्य उदाहरणं यथा ऋग्वेदस्य सम्पूर्णमपि वाक्सूक्तमस्ति। यत्र केवलं भाषाया: वाण्या: वा वर्णनं प्राप्यते-

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥१॥[7]

अस्यामेव भारतीयचिन्तनपरम्परायां भाषाया: चिन्तनमेतावज्जातं यत् सृष्टिः काव्यरूपेण ईश्वरश्च कविरूपेण स्वीकृतः यथा- देवस्य पश्य काव्यं न ममार न जीर्यति।[8] उक्तमस्ति यत् तस्य देवस्य काव्यं न कदापि मरणं प्राप्नोति न च विनश्यति। सृष्टे: विविधरूपाणि 'नाम' शब्देनोक्तानि अस्य नामरुपात्मकस्य जगत: सृष्टे: रहस्यस्य च कुञ्जिका 'व्याकरणम्' एव इति मन्यते। यदि शास्त्राणां ज्ञानराशि: गूढरहस्यं च ज्ञातव्यमस्ति चेत् केवलं व्याकरणस्यैव द्वारेण सम्भवम्। भारतीयचिंतनस्य भाषा (संकल्पना) व्याकरणमूला अस्ति अत: अत्र व्याकरणस्य भाषाविषयकं चिन्तनं द्रष्टव्यमेव। तच्च चिन्तनं महाभाष्यस्य पस्पशाह्निके व्याकरणस्य अन्यग्रन्थेषु च स्पष्टतया प्रतिपादितम्। पतञ्जले: चिन्तनं भाषावैज्ञानिकं चिन्तनमेवास्ति। महाभाष्यस्य भाषाविषयकचिन्तनाद् प्राक् पाणिनीयव्याकरणे प्रतिपादितं मतं विवेचयाम:।

पाणिनीयव्याकरणे एकं सूत्रं समायाति 'सुप्तिङन्तं पदम्' अत्र पाणिनि: सुबन्तस्य तिङन्तस्य च पदसंज्ञां करोति तथा च वदति यत् भाषायां यत् किमपि भवति तत् सुबन्तं भवति अथवा तिङन्तम्। अर्थात् जगति विद्यमानं प्रत्येकं पदार्थं वस्तुसत्ता वा नामपदेन तथा च क्रियापदम् आख्यातपदेन एव ज्ञायते। नामाख्यातौ विहाय जगति अथवा भाषायां किमपि न शिष्यते। एकवारं क्षणमात्रकाले चिन्तयाम: यत् संसारस्य वस्तुनाम् अथवा सत्तानां नाम यदि न स्यात् तर्हि अस्माकं स्थितिः कीदृशी भविष्यति? अर्थात् वयं नाम विना व्यवहारं कर्तुं सक्षमा: न भवाम: तथा जगति नास्ति तादृशी कापि भाषा यस्यां सुबन्तानि तिङन्तानि च न स्यु:। एतादृश्या: भाषाया: कल्पना असम्भवा यत्र नामाख्यातौ न भवत:। अत: अनेन सिध्यति यत् पाणिनीयं व्याकरणं भाषावैज्ञानिकं सर्वशास्त्रोपकारकं च। एवमनेकानि सिद्धान्तानि सन्ति यानि सर्वासु भाषासु दृश्यन्ते यानि पाणिनीयव्याकरणे सन्ति। इदानीं महाभाष्यकारस्य भाषाविषयकं चिन्तनं तथा च भारतीयवैय्याकरणचिन्तनं विचार्यते महाभाष्यकार: पतञ्जलि: स्वकीयं भाष्यमेवं प्रारभते-

[7] ऋग्वेद १०.१२५.१

[8] अथर्ववेद १०.८.३२

"अथ शब्दानुशासनम्" अथ इत्ययं शब्दोऽधिकारार्थः प्रयुज्यते। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यमर्थात् अत्र भाष्यकार: शब्दानामनुशासनं करोति। अनुशासनं नाम उपदेशं करोति यत् शब्द: क:? किं च तस्य स्वरुपं? शब्दानुशासनस्य किं प्रयोजनम् इत्येतान् सर्वान् अपि विषयान् अनुशासने प्रस्तौति। पुन: प्रश्न: समुत्पद्यते यत् अनुशासनं तु क्रियते परन्तु केषां शब्दानाम् इति। केषां शब्दानां? लौकिकानां वैदिकानां च। तत्र लौकिकास्तावत् 'गौरश्व: पुरुषो हस्ती शकुनिर्मृगो ब्राह्मण इति। वैदिका: खल्वपि- शंनो देवीरभिष्टये, इषे त्वोर्जे त्वा, अग्निमीडे पुरोहितम्, अग्न आ याहि वीतये इति। अर्थात् अत्र लौकिकानां वैदिकानां च शब्दानामुपदेश: क्रियते। लौकिका: अर्थात् ये शब्दा: लोके प्रयुज्यन्ते तथा च वैदिका: ये वेदे प्रयुक्ता: उभयोरपि उपदेश: क्रियते।

इदानीमत्र शब्दस्य विषये प्रतिपाद्यते यत् शब्दस्य स्वरुपं किमस्ति? इत्याकांक्षायां भाष्यकाराह- "अथ गौरित्यत्र क: शब्द:? किं यत्तत् सास्ना-लाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्द:? नेत्याह द्रव्यं नाम तत्। यत्तर्हि तदिङ्गितं चेष्टितं निमिषितं स शब्द:? नेत्याह क्रिया नाम सा। यत्तर्हि तत् शुक्लो नील: कपिल: कपोत: इति स शब्द:? नेत्याह गुणो नाम स:। यत्तर्हि भिन्नेष्वभिन्नं छिन्नेष्वच्छिन्नं सामान्यभूतं स शब्द:? नेत्याह आकृतिर्नाम सा। कस्तर्हि शब्द:? येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां संप्रत्ययो भवति स शब्द:। अथवा प्रतीतपदार्थो लोके ध्वनि: शब्द: इत्युच्यते। तद्यथा- शब्दं कुरु, मा शब्दं कार्षी:, शब्दकार्ययं माणवक इति ध्वनिं कुर्वन् एवमुच्यते तस्माद्धनि: शब्द:। अत्र इदानीं शब्दस्य विषये चर्चा क्रियते यत् गौ इत्यस्मिन् शब्द: क:? तर्हि अत्र प्रथमतया उच्यते यत् स शब्द: यत्र सास्ना-लाङ्गूल-ककुद-खुर-विषाण-अर्थरुपं भवति स शब्द: भवति वा। भाष्यकार: वदति यत् स शब्द: नास्ति। तत् तु द्रव्यम् अस्ति। तर्हि वादी पुन: पृच्छति इङ्गितं चेष्टितं निमिषितं स शब्द: वा। भाष्यकार वदति यत् स: शब्द: नास्ति सा तु क्रिया अस्ति। पुन: पृच्छति यत् नील:, कृष्ण:, कपोत: स: शब्द:। पुन: प्रतिषेधयति यत् स: शब्द: नास्ति, सः तु गुण:। यत् भिन्नम् अभिन्नम् सामान्यभूतम् अस्ति स शब्द: अस्ति वा। न सोऽपि शब्द: नास्ति। सा तु आकृतिमात्रा अस्ति। इदानीं प्रतिवादी वदति यत् एतत् सर्वोऽपि शब्दः नास्ति तर्हि कः शब्दः? भाष्यकारः आह– येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः। अर्थात् शब्दस्तु स एव यदस्माकं मनसि बुद्धौ वा सम्प्रत्ययात्मको भवति। योऽस्माकं मानसे भवति यस्य विनाशः न भवति स शब्दः यथा चित्रकारस्य मनसि तच्चित्रं भवति यत् निर्मेयं भवति, यथा च कुम्भकारस्य मनसि घटनिर्माणात् पूर्वं या आकृतिः भवति तामेवाकृतिं स घटरूपेण आकारयति। कुम्भकार इव अस्माकं मनसि शब्दाः सम्प्रत्ययात्मकरूपेण विद्यन्ते, प्रयोगसमये तैरेव शब्दैः क्रमेण ध्वन्यात्मकरूपेण अभिव्यज्यते। शब्दानां रूपद्वयं भवति नित्यः कार्यश्च। नित्यः शब्दः सम्प्रत्ययात्मकः कार्यश्च विवर्तरूपः, यथा वाक्यपदीये उच्यते–

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥[9]

शब्दतत्त्वस्य विवर्त्तरूपेण एव इदं सर्वं जगत् वर्त्तते। शब्दः एक एव क्रमरहितः अविभाज्यश्चास्ति आकाशवत् व्यापकः आकाशगुणत्वाच्च। एतादृग्चिन्तनं केवलं व्याकरणस्य महाभाष्ये एव प्राप्यते नान्यत्र, अस्य चिन्तनस्य आधारः भारतीयज्ञानपरम्परा एव अस्ति। इदानीं विचार्यते यत् शब्दानुशासनस्य किं प्रयोजनम्? उच्यते व्याकरणाध्ययनस्य प्रधानतया पञ्चप्रयोजनानि सन्ति, तानि प्रयोजनानि– रक्षोहागमलघ्वसन्देहाः प्रयोजनम्।[10] तत्र प्रथमं प्रयोजनं रक्षा- अर्थात् वेदानां रक्षार्थं व्याकरणस्य अध्ययनं विधेयं यतोहि

---

[9] वाक्यपदीयं ब्र.का.१

[10] महाभाष्यं पस्पशाह्निकम्

लोपागमवर्णविकारान् यः जानाति स एव वेदानां रक्षणं कर्तुं शक्नोति, लोपागमश्च व्याकरणेन विना ज्ञातुं न शक्यते। द्वितीयं प्रयोजनम् ऊहः अर्थात् वेदेषु सर्वेऽपि मन्त्राः सलिङ्गाः सविभक्तिकाः न सन्ति अतः यथायोगं तेषामूहा कर्त्तव्या। तृतीयं च प्रयोजनम् आगमः अर्थात् ब्राह्मणेन निष्कारणमेव वेदोऽध्येयो ज्ञेयश्च। अयं ब्राह्मणस्य धर्म यत् सः साङ्गं वेदानामध्ययनं कुर्यात् तच्च व्याकरणं विना न संभवति। चतुर्थं प्रयोजनं लघुः अर्थात् लघ्वर्थं च व्याकरणमध्येयं व्याकरणेन विना लघुः ज्ञातुं न शक्यते पञ्चमं च प्रयोजनमसन्देहः असन्देहार्थं च व्याकरणस्याध्ययनं विधेयम्। एतानि व्याकरणाध्ययनस्य मुख्यानि प्रयोजनानि। आनुषङ्गिकानि प्रयोजनान्यपि सन्ति येषु व्याकरणस्य दार्शनिकं स्वरूपं प्रस्तुतं तेषु "चत्वारि......"[11] इत्यनेन वाक्येन उपस्थापितम्। अस्मिन्मन्त्रे एकस्य महावृषभस्य रूपकेण भाषायाः दार्शनिकं स्वरूपमुपस्थापितम्। अस्य वर्णनमेवं विहितमस्ति– अस्य भाषावृषभस्य 'चत्वारि श्रृङ्गाः' अर्थात् चत्वारि पदजातानि सन्ति तानि नामाख्यातोपसर्गनिपाताः सन्ति। अत्र केषाञ्चनाचार्याणां मतमिदं यत् चत्वारि चतस्रः वाण्यः गृहीताः परा-पश्यन्ति-मध्यमा-वैखरी च। परन्तु भाष्यकारेण अत्र चत्वारिपदेन पदजातानि एव गृहीतानि। अस्य वृषभस्य 'द्वे शीर्षे' नित्यकार्यरूपे स्तः। अर्थात् शब्दस्य द्वे रुपे एकः नित्यः अपरश्च कार्यः। अस्य 'त्रयः पादाः' सन्ति- भूतभविष्यद्वर्तमानरूपाः। 'सप्त हस्तासोऽस्य' अर्थात् अस्य सप्तहस्ताः सप्तविभक्तयः। 'त्रिधा बध्दः' त्रिषु स्थानेषु बध्दः उरः कण्ठे शिरसीति। एतादृशः वृषभः रोरवीति रवः करोति। 'महादेवः' अर्थात् सः महादेवः शब्दः 'मर्त्यां' मरणधर्माणो मनुष्याः 'आविवेश' अर्थात् मनुष्यानाविवेश इति। एवम्प्रकारेण महाभाष्ये यादृशं रूपकं भाषायाः प्रस्तुतं तादृशं रूपकं विश्वस्य कस्यामपि भाषायां न प्राप्यते। एतद् महच्चिन्तनं भारतीयज्ञानपरम्परायां प्राप्तुं शक्यते। अत एव भारतीयज्ञानपरम्परा अन्याभिः परम्पराभिः भिन्ना भवति। एतादृशं दार्शनिकं स्वरूपं व्याकरणस्यास्मिन् भाष्ये अस्ति। अत्र यत्किमपि उक्तं तत् सर्वमपि सर्वासु भाषासु विद्यते यथा- कालत्रयम्, सप्तविभक्तयः, नित्यकार्यरुपात्मानौ शब्दौ इत्यादयः। "अत्र व्याकरणे कमपि पदबन्धमेव शब्दनाम्ना अथवा शब्द संज्ञया न व्यवह्रियते, अपितु सम्पूर्णाम् उक्तिमथवा प्रबन्धमेव अभिधीयते यत् स्फोटः शब्दस्य मूलतत्वं विद्यते तथा च ध्वनिः शब्दस्य गुणः विद्यते। मानवस्य वाण्याम् उभयमपि तत्त्वं विद्यमानं जायते, परन्तु पशुपक्षिषु केवलं ध्वनिरेव भवति तेषु स्फोटस्य अभावः भवति।" अपरत्र च भाष्यकारेण उक्तम्-

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहां निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्याः वदन्ति॥ [12]

अत्र भाष्यकारः अस्य भाष्यं कुर्वन् एवं वदति यत् चत्वारि पदजातान्येव तानि वाक्-परिमितानि तान्येव ये मनीषिणः मनसः ईषीणः सन्ति ते विदुः अजानन्। त्रीणि गुहायां निहितानि सन्ति तानि न चेष्टन्ते, न निमिषन्तीत्यर्थः। या तुरीया अर्थात् चतुर्थी वाक् अस्ति सा वाक् सर्वैरपि मनुष्यैः व्यवह्रियते। अत्र एतच्चिन्तनं यत् अत्र चतुर्ण्णां वाचां विषये निरुपितं परं महाभाष्यकारेण न निरुपितं, सः तु पदजातानि एव भाष्यं करोति, परं महाभाष्यस्य उद्योतकारः नागोजी भट्टः अत्र चतुर्ण्णां वाणीनां विषये वर्णनं करोति यत् मनुष्याः चतुर्थीं वाणीमेव वदन्ति-

वैखर्य्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भूतम्।
अनेकतीर्थभेदायास्त्रय्याः वाचः परं पदम्॥

एवं पुनः तस्याः एव वाण्याः स्वरुपं विवृण्वन् आह–

[11] चत्वारि श्रृङ्गा त्रयोऽस्य पादाः द्वे शीर्षे सप्त हस्तासोऽस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश॥ - महाभाष्यं पस्पशाह्निकम्

[12] महाभाष्यं पस्पशाह्निकम्

उत त्व: पश्यन्न ददर्श-वाचमुत त्व: श्रृण्वन्न श्रृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्त्रे जायेव पत्य उशती सुवास:॥[13]

अर्थात् कश्चित् इमां पश्यन्नपि न पश्यति, श्रृण्वन् अपि एनां वाणीं न श्रृणोति। एवंविध: अविद्वान् पुरुष: भवति। परन्तु य: ज्ञानवान् भवति तस्य कृते तु इयं वाणी जाया इव स्वकीयं तनुं विसस्त्रे विस्तारयति एवमेव ज्ञानवन्तमियं विवृणुते। एतादृशं चिन्तनं न कुत्रापि द्रष्टुं शक्यते। अस्या: भाषाया: व्याकरणस्य चायं दार्शनिक: पक्ष:। इदानीं व्याकरणं कथं कार्यं करोति इति महाभाष्यकार: अत्र वर्णयति –

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखाय: सख्यानि जानते भद्रैषां
लक्ष्मीर्निहिताधिवाचि॥[14]

अत्र भाष्यकार: व्याकरणस्य कार्यं प्रदर्शयन् आह यत् व्याकरणं तितउ अर्थात् परिपवनमिव (छलनी) भवति यथा परिपवनेन सक्तु पवित्रीक्रियते एवमेव व्याकरणं वाणीं पुनाति। यथा सक्तो: परिपवने सति यद् किञ्चदपि दोषत्वं भवति तदपगच्छति तथा च स सक्तु: परिशुध्द: जायते एवमेव व्याकरणं वाणीं पवित्वा दोषानपाकरोति। एतेन व्याकरणेन य: दुर्गम: वाग्विषय: भवति स: सरलतया प्राप्यते तथा च वाचि भद्रता समायाति। एतादृशं भाषाविषयकं वाणीविषयकं वा चिन्तनं व्याकरणे विद्यते, यच्चिन्तनमन्यत्र कस्यामपि भाषायां प्राप्तुं न शक्यते। एतच्चिन्तनमेव सर्वासां भाषाणां सिध्दान्तरुपेण उपस्थाप्यते। इदानीं महाभाष्ये यत् शब्दार्थयोर्विषये वर्णितं तदत्र भाषादृशा विचार्यते। भाष्यकारेण शब्द: अर्थ: अनयो: सम्बन्ध: सर्वमपि नित्यमिति वर्णितम् यथा महाभाष्यकारेण वार्तिकं प्रस्तुतम्। तस्यायमर्थ: यत् शब्द: सर्वदैव नित्य: तस्यार्थ: नित्य: अनयो: सम्बम्ध: अपि नित्य: यथा हि रघुवंशे वर्णितम् यत् शब्दार्थौ नित्यौ, अनयो: संपृक्तता सम्बन्धोऽत्र वर्णित:। अत्र भाष्ये लौकिकान् उदाहरणान् प्रस्तूय शब्दार्थयो: सम्बन्ध: वर्णित: नित्यता च त्रयाणामपि प्रतिपादिता। शब्दार्थौ लोकत: सिध्दौ स्त:। शास्त्रेण धर्म नियम:।

शब्दानां साधुत्वासाधुत्त्वम्

अत्र भाष्यकार: शाब्दानां साधुत्वासाधुत्व पक्षे विचार: करोति। भाष्यकार: वदति शब्दानां ज्ञाने धर्म: भवति तदा वादी प्रतिप्रश्नं करोति यत् शब्दानां ज्ञाने धर्म: अस्ति चेत् अपशब्दानां ज्ञाने अधर्म: भविष्यति। अल्पीयांस: हि शब्दा: भूयांसो हि अपशब्दा: यथा गौ: इत्यस्य गावी, गोणी, गोता, गोपोतलिका इत्यमादयोऽपभ्रंशा:। अत: धर्म: तु अल्पमेव भविष्यति परन्तु भूयान् अधर्म: प्राप्नोति। तदानीं भाष्यकार: समाधानं कुर्वन् एवं आह यत् शब्दानां प्रयोग: शास्त्रपूर्वकं क्रियते चेत् धर्म: प्राप्नोति अभ्युदयेन युज्यते, यथा य: विधिपूर्वकं वेदं पठति स: फलवान् भवति। अर्थात् शब्दानां प्रयोग: शास्त्रपूर्वकं कर्त्तव्यम् अर्थात् नियमेन तेषां प्रयोग: यदि क्रियते चेत् अधर्म: न भवति। अत्र यत् असाधुशब्दानां वर्णनं कृतं यथा गौ इत्यस्य पदस्य बहवोऽपभ्रंशा: गावी, गोणी, गोता, गोपोतलिका इत्येवमादय: तत्र असाधु पदेन अशुध्दशब्दा: इति न ग्राह्यम्। असाधु इत्यस्यार्थ: क्षेत्रीय: इति भवति, अर्थात् अनेन एवं प्रतिपाद्यते यत् कश्चित् यदि 'गावी' आदय: शब्दान् उच्चरति चेत् तस्य क्षेत्रस्य विषये ज्ञायते यत् केनेचिदपि विशिष्टेन क्षेत्रेण संबध्द: अस्ति। यदि असाधु इत्यस्य अर्थ: अशुध्दमिति स्यात् तर्हि तुलसीदासस्य रामचरितमानस सम्पूर्णमपि अनर्थकं स्यात् परन्तु एवं नास्ति। भाष्यकारेण यत् असाधुशब्दानां प्रयोग: कृत: स प्रयोग: इदं ज्ञापयति यत् य: साधु शब्दान् जानाति तस्य कृते क्षेत्रीय शब्दा: अपि ज्ञाता: भवन्ति। अनेन एव नियमेन 'रामचरितमानस' काव्यग्रन्थ: सार्थकत्वं भजते।

[13] महाभाष्यं पस्पशाह्निकम्

[14] महाभाष्यं पस्पशाह्निकम्

## निष्कर्ष

महाभाष्यस्य भाषाविषयकं चिन्तनं न केवलं संस्कृतस्य कृते अपितु सर्वासां भाषाणां कृते सिध्दान्तं प्रस्तौति। भारतीयचिन्तनपरम्परायां च शब्दशास्त्रमेव व्याकरणस्य प्रधानविषय: नास्ति अपितु काव्यशास्त्रस्य, दर्शनशास्त्रस्य अध्यात्मस्य च विवेच्य विषय: अस्ति। भाषाविज्ञानम् अपि पाणिनीयव्याकरणस्य नियमान् सार्वभौमत्वेन अङ्गीकरोति।

## सन्दर्भ


1. वाक्यपदीयम् (ब्रह्मकाण्डम्) (भर्तृहरिः, सोपज्ञवृत्या अम्बाकर्त्र्या च सम्भूषितम्), सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी : १९८८.
2. अष्टाध्यायीसूत्रपाठः (पाणिनिमुनिप्रणीतः), रामलाल कपूर ट्रस्ट, बहालगढ, सोनीपत, हरियाणा : १९८८.
3. काशिका (श्रीवामनजयादित्यविरचिता), सं. विजयपालो विद्यावारिधिः, रामलालकपूरट्रस्ट, बहालगढ़, सोनीपत, हरियाणा : सं.१; १९९७.
4. काशिकावृत्तिः (वामनजयादित्यौ) {चतुर्थपञ्चमषष्ठाध्यायात्मकद्वितीयभागः}, व्या. ईश्वरचन्द्रः, चौखम्बा संस्कृतप्रतिष्ठान, नवदेहली : २०१०.
5. व्याकरणमहाभाष्यम् (महर्षिपतञ्जलिः, 'ज्योत्सना' समुद्भासितम्) (चतुर्थोऽध्यायः), टीकाकारः-हरिनारायणतिवारी, चौखम्बा पब्लिशिंग हाऊस, नवदेहली : २००९.
6. वैयाकरणसिद्धान्तकौमुदी (भट्टोजिदीक्षितः, वासुदेवदीक्षितप्रणीतबालमनोरमाटीकया समलङ्कृता), {तृतीयचतुर्थभागौ} सं. गोपालदत्तपाण्डेयः, चौखम्बासुरभारतीप्रकाशन, वाराणसी : सं.१५; २००७.
7. व्याकरणमहाभाष्यम् (पतञ्जलिः,कैयटनिर्मितप्रदीपव्याख्यान्वितम् मधुसूदनप्रसादमिश्र कृतप्रकाश- व्याख्यान्वितञ्च), चौखम्बाविद्याभवनम्, वाराणसी : २००३.
8. पाणिनीयशिक्षा, व्या. शिवराजकौण्डिन्न्यायनः, चौखम्बा विद्याभवनम्, वाराणसी : २००८.
9. वाक्यपदीयम् (भर्तृहरिः, वृत्तिसमुद्देशात्मकम्) (हेलाराजविरजितप्रकाशव्याक्यया रघुनाथशर्माविरचितया अम्बाकर्त्रीव्याख्यया सहित), (तृतीयकाण्डम्), सं. भागीरथप्रसादत्रिपाठी "वागीशः शास्त्री", सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी : १९७७.
10. अग्रवाल, वासुदेवशरण, पाणिनिकालीन भारतवर्ष {अष्टाध्यायी का सांस्कृतिक अध्ययन}, चौखम्बा विद्याभवन, वाराणसी : सं.२; १९६९.


## द्वितीयकस्रोतांसि


11. त्रिपाठी, रामसुरेश, संस्कृत व्याकरण दर्शन, प्राइवेट लिमिटेड, दिल्ली : सं.१; १९७२.
12. मीमांसक, युधिष्ठिर, संस्कृत व्याकरण शास्त्र का इतिहास (भाग १-२), रामलाल कपूर ट्रस्ट, बहालगढ, सोनीपत, हरियाणा : २०५७ वि.सं.
13. वर्मा, सत्यकाम, व्याकरण की दार्शनिक भूमिका, मुन्शीराम मनोहरलाल, नवदेहली : १९७१.